श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पार्थसारथ्यष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पार्थसारथ्यष्टोत्तरशतनामस्तोत्रम् ॥

ध्यानम्

मुरान्तकं सुरार्चितं धरापतिं परात्परं
निरामयं जराहरं करेण वेत्रधारिणम्।
सदा ऋते प्रतिष्ठितं भजामि विश्वरूपिणं
सदाशिवप्रियं हरिं नमामि पार्थसारथिम्॥ 1 ॥

भूपेन तेन मुचुकुन्द महात्मना यः
संस्थापितोऽत्र मुचुकुन्दपुरे मनोज्ञे।
शङ्खेन चारुतरवेत्रधृतेन दोष्णा
संक्षोभयन्तमखिलं भुवनं तमीडे॥ 2 ॥

पार्थस्य युद्ध विमुखस्य हृदिस्थ मौढ्यम्
गीतामृतेन शमितं किल येन सद्यः।
वेदान्तवेद्यमनघं पुरुषं पुराणम्
तं पार्थसारथिमहं प्रणतोऽस्मि भक्त्या॥ 3 ॥

अथ स्तोत्रम्

ओं श्रीकृष्णः पार्थसूतः श्रीतुलसीवनसंश्रितः।
ईश ईड्य इळाकान्तो लीलार्थमनुजाकृतिः॥ 1 ॥

कृतभारतयुद्धार्थसूतवेषः श्रियःपतिः।
व्यासप्रत्यक्षितस्वार्चविग्रहो विमलो विभुः॥ 2 ॥

कृष्णार्तिघ्नः कैरविणीसरस्तीरविहारभूः।
रुक्मिणी सात्यकीरामप्रद्युम्नोषाधवान्वितः॥ **3** ॥

आत्रेयपूजासन्तुष्टो वृन्दारण्यकृतालयः।
आनन्दाख्यविमानस्थ आत्रेयर्षिप्रतिष्ठितः॥ **4** ॥

प्रपन्नागोहरः पार्थराज्यदो रुक्मिणीप्रियः।
शङ्खराङ्गदक्षिणकरो वरदेतरपाणिमान्॥ **5** ॥

नन्दकी गोविन्द उरुक्रमः कल्याणकारणम्।
सुमत्याख्यनृपश्रेष्ठवरदो वेङ्कटेश्वरः॥ **6** ॥

नीळाधवो धरानन्दवर्धनो वृष्णि पुङ्गवः।
सुमत्यवनिपालार्थकुटुम्बसहितः सुधीः॥ **7** ॥

वेदवेद्योऽच्युतो यज्ञमूर्तिर्यज्ञभुगुत्तमः।
सुमतिप्रेमरचितमहोत्सवविधिप्रियः॥ **8** ॥

महामतिर्महाभागो महायोगी कविप्रियः।
विष्णुर्वेङ्कटकृष्णाख्यो वरदो वत्सलोऽनघः॥ **9** ॥

सालिग्रामशिलामाली पीनवक्षाः प्रियोत्सवः।
केशवार्येष्टिसन्तुष्टो यतीन्द्रोत्पत्ति कारणम्॥ **10** ॥

मयूरनगरीनाथो जगद्दुरितभञ्जनः।
गीतोपनिषदाचार्यो विश्वरूपप्रदर्शनः॥ **11** ॥

भक्तिसारतपस्तुष्टोऽनन्तोऽनन्तगतिः पतिः।
भक्तिसारस्तुतस्तोत्रप्रियः पक्षीश्वरध्वजः॥ **12** ॥

परकालादिसूक्तीड्यो वासुदेवः सुरारिहा।
इन्द्रसोमाग्नि वरुणमीनतीर्थविहारभूः॥ **13** ॥

गम्भीराम्भस्समद्भूतसद्यःसम्फुल्लपद्मदृक्।
पञ्चमूर्तिः पञ्चहेतिः पञ्चबाणपिता हरिः ॥ **14** ॥

मन्मथो वेदवल्लीशो श्रीशः सर्वशुभाश्रयः।
भृगुपुत्रीप्रियो देवः भृग्वाराधनतोषितः ॥ **15** ॥

चतुर्भुजः पद्मनाभः शेषशायी सुखायनम्।
माघशुक्ल द्वादशीकृतोद्वाहश्च कृपानिधिः ॥ **16** ॥

रामः सीतासमायुक्तो मधुमद्वरदो वसुः।
ससौमित्रिः सभरतः साञ्जनेयो धनुर्धरः ॥ **17** ॥

गजेन्द्रवरदस्ताक्ष्र्यसमारूढो नृपार्चितः।
आरूढयोगो नृहरिर्मौद्गल्यवरदोऽमलः ॥ **18** ॥

शरण्यः शरणः शान्तः शरणागतवत्सलः।
महामन्त्रार्चनप्रीतो महैश्वर्यप्रदायकः ॥ **19** ॥

## फलश्रुतिः

य इदं परमं पुण्यं नाम्नामष्टोत्तरं शतम्।
पार्थस्य सारथेःस्तोत्रं सर्वाभीष्टप्रदायकम् ॥ **1** ॥

प्रत्यहं प्रातरुत्थाय प्रयतः पठते नरः।
तस्य विद्या धनं शान्तिः पुष्टिस्तुष्टिश्च जायते ॥ **2** ॥

स्वयमेव हरिः साक्षात् भूत्वा सारथिरुत्तमः।
तस्य जीवनयात्रायां कुरुते सर्वमङ्गलम् ॥ **3** ॥

॥ इति श्री पार्थसारथ्यष्टोत्तरशतनामस्तोत्रं समाप्तम् ॥